NOTES PDF DOWNLOAD

Notes PDF Download

# Panchmukhi Hanuman Kavach PDF




## ॥ पंचमुख हनुमत्कवचम् ॥

### । श्रीगणेशाय नमः ।

अस्य श्री पंचमुखहनुमन्मंत्रस्य ब्रह्मा ऋषिः गायत्रीछंदः

। गायत्रीछन्दः ।

पंचमुखविराट् हनुमान् देवता ह्रीं बीजं श्रीं शक्तिः

। श्रीं शक्तिः ।

क्रौं कीलकं क्रूं कवचं क्रैं अस्त्राय फट् इति दिग्बंधः ।

### । श्री गरुड उवाच ।

अथ ध्यानं प्रवक्ष्यामि शृणु सर्वांगसुंदरि ।

यत्कृतं देवदेवेन ध्यानं हनुमतः प्रियम् ॥ 1 ॥

https://notespdfdownlo

पंचवक्त्रं महाभीमं त्रिपंचनयनैर्युतम् ।
बाहुभिर्दशभिर्युक्तं सर्वकामार्थसिद्धिदम् ॥ 2 ॥

पूर्वं तु वानरं वक्त्रं कोटिसूर्यसमप्रभम् ।
दंष्ट्राकरालवदनं भृकुटीकुटिलेक्षणम् ॥ 3 ॥

अस्यैव दक्षिणं वक्त्रं नारसिंहं महाद्भुतम् ।
अत्युग्रतेजोवपुषं भीषणं भयनाशनम् ॥ 4 ॥

पश्चिमं गारुडं वक्त्रं वक्रतुंडं महाबलम् ।
सर्वनागप्रशमनं विषभूतादिकृंतनम् ॥ 5 ॥

उत्तरं सौकरं वक्त्रं कृष्णं दीप्तं नभोपमम् ।
पातालसिंहवेतालज्वररोगादिकृंतनम् ॥ 6 ॥

ऊर्ध्वं हयाननं घोरं दानवांतकरं परम् ।
येन वक्त्रेण विप्रेंद्र तारकाख्यं महासुरम् ॥ 7 ॥

https://notespdfdownload.com/

जघान शरणं तत्स्यात्सर्वशत्रुहरं परम् ।
ध्यात्वा पंचमुखं रुद्रं हनूमंतं दयानिधिम् ॥ 8 ॥

खड्गं त्रिशूलं खट्वांगं पाशमंकुशपर्वतम् ।
मुष्टिं कौमोदकीं वृक्षं धारयंतं कमंडलुम् ॥ 9 ॥

भिंदिपालं ज्ञानमुद्रां दशभिर्मुनिपुंगवम् ।
एतान्यायुधजालानि धारयंतं भजाम्यहम् ॥ 10 ॥

प्रेतासनोपविष्टं तं सर्वाभरणभूषितम् ।
दिव्यमाल्यांबरधरं दिव्यगंधानुलेपनम् ।
सर्वाश्चर्यमयं देवं हनुमद्विश्वतोमुखम् ॥ 11 ॥

पंचास्यमच्युतमनेकविचित्रवर्ण-
-वक्त्रं शशांकशिखरं कपिराजवर्यम् ।
पीतांबरादिमुकुटैरुपशोभितांगं
पिंगाक्षमाद्यमनिशं मनसा स्मरामि ॥ 12 ॥

https://notespdfdownload.com/

मर्कटेशं महोत्साहं सर्वशत्रुहरं परम् ।

शत्रुं संहर मां रक्ष श्रीमन्नापदमुद्धर ॥ 13 ॥

हरिमर्कट मर्कट मंत्रमिदं

परिलिख्यति लिख्यति वामतले ।

यदि नश्यति नश्यति शत्रुकुलं

यदि मुंचति मुंचति वामलता ॥ 14 ॥

**। ॐ हरिमर्कटाय स्वाहा ।**

ॐ नमो भगवते पंचवदनाय पूर्वकपिमुखाय सकलशत्रुसंहारकाय स्वाहा ।

ॐ नमो भगवते पंचवदनाय दक्षिणमुखाय करालवदनाय नरसिंहाय सकलभूतप्रमथनाय स्वाहा ।

ॐ नमो भगवते पंचवदनाय पश्चिममुखाय गरुडाननाय सकलविषहराय स्वाहा ।

ॐ नमो भगवते पंचवदनाय उत्तरमुखाय आदिवराहाय सकलसंपत्कराय स्वाहा ।

ॐ नमो भगवते पंचवदनाय ऊर्ध्वमुखाय हयग्रीवाय सकलजनवशंकराय स्वाहा ।

ॐ अस्य श्री पंचमुखहनुमन्मंत्रस्य श्रीरामचंद्र ऋषिः

अनुष्टुप्छंदः पंचमुखवीरहनुमान् देवता हनुमान् इति बीजं वायुपुत्र इति शक्तिः

अंजनीसुत इति कीलकं श्रीरामदूतहनुमत्प्रसादसिद्ध्यर्थे जपे विनियोगः ।

https://notespdfdownload.com/

इति ऋष्यादिकं विन्यसेत् ।

## । अथ करन्यासः ।

ॐ अंजनीसुताय अंगुष्ठाभ्यां नमः ।

ॐ रुद्रमूर्तये तर्जनीभ्यां नमः ।

ॐ वायुपुत्राय मध्यमाभ्यां नमः ।

ॐ अग्निगर्भाय अनामिकाभ्यां नमः ।

ॐ रामदूताय कनिष्ठिकाभ्यां नमः ।

ॐ पंचमुखहनुमते करतलकरपृष्ठाभ्यां नमः ।

## । अथ अंगन्यासः ।

ॐ अंजनीसुताय हृदयाय नमः ।

ॐ रुद्रमूर्तये शिरसे स्वाहा ।

ॐ वायुपुत्राय शिखायै वषट् ।

ॐ अग्निगर्भाय कवचाय हुम् ।

ॐ रामदूताय नेत्रत्रयाय वौषट् ।

ॐ पंचमुखहनुमते अस्त्राय फट् ।

पंचमुखहनुमते स्वाहा इति दिग्बंधः ।

https://hindupdfdownload.com/

## । अथ ध्यानम् ।

वंदे वानरनारसिंहखगराट्क्रोडाश्ववक्त्रान्वितं
दिव्यालंकरणं त्रिपंचनयनं देदीप्यमानं रुचा ।
हस्ताब्जैरसिखेटपुस्तकसुधाकुंभांकुशाद्रिं हलं
खट्वांगं फणिभूरुहं दशभुजं सर्वारिवीरापहम् ।

## ।अथ मंत्रः ।

ॐ श्रीरामदूताय आंजनेयाय वायुपुत्राय महाबलपराक्रमाय

सीतादुःखनिवारणाय लंकादहनकारणाय महाबलप्रचंडाय फाल्गुनसखाय कोलाहलसकलब्रह्मांडविश्वरूपाय

सप्तसमुद्रनिर्लंघनाय पिंगलनयनाय अमितविक्रमाय सूर्यबिंबफलसेवनाय दुष्टनिवारणाय दृष्टिनिरालंकृताय संजीविनीसंजीवितांगद-लक्ष्मणमहाकपिसैन्यप्राणदाय

दशकंठविध्वंसनाय रामेष्टाय महाफाल्गुनसखाय सीतासहितरामवरप्रदाय षट्प्रयोगागमपंचमुखवीरहनुमन्मंत्रजपे विनियोगः ।

ॐ हरिमर्कटमर्कटाय बंबंबंबंबं वौषट् स्वाहा ।

ॐ हरिमर्कटमर्कटाय फंफंफंफंफं फट् स्वाहा ।

ॐ हरिमर्कटमर्कटाय खेंखेंखेंखेंखें मारणाय स्वाहा ।

ॐ हरिमर्कटमर्कटाय लुंलुंलुंलुंलुं आकर्षितसकलसंपत्कराय स्वाहा ।

ॐ हरिमर्कटमर्कटाय धंधंधंधंधं शत्रुस्तंभनाय स्वाहा ।

ॐ टंटंटंटंटं कूर्ममूर्तये पंचमुखवीरहनुमते परयंत्र परतंत्रोच्चाटनाय स्वाहा ।

ॐ कंखंगंघंङं चंछंजंझंञं टंठंडंढंणं तंथंदंधंनं पंफंबंभंमं यंरंलंवं शंषंसंहं लंक्षं स्वाहा ।

https://notespdfdownload.com/

। इति दिग्बंधः ।

ॐ पूर्वकपिमुखाय पंचमुखहनुमते टंटंटंटंटं सकलशत्रुसंहरणाय स्वाहा ।

ॐ दक्षिणमुखाय पंचमुखहनुमते करालवदनाय नरसिंहाय

ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः सकलभूतप्रेतदमनाय स्वाहा ।

ॐ पश्चिममुखाय गरुडाननाय पंचमुखहनुमते मंमंमंमंमं सकलविषहराय स्वाहा ।

ॐ उत्तरमुखाय आदिवराहाय लंलंलंलंलं नृसिंहाय नीलकंठमूर्तये पंचमुखहनुमते स्वाहा ।

ॐ ऊर्ध्वमुखाय हयग्रीवाय रुंरुंरुंरुंरुं रुद्रमूर्तये सकलप्रयोजननिर्वाहकाय स्वाहा ।

ॐ अंजनीसुताय वायुपुत्राय महाबलाय सीताशोकनिवारणाय

श्रीरामचंद्रकृपापादुकाय महावीर्यप्रमथनाय ब्रह्मांडनाथाय कामदाय पंचमुखवीरहनुमते स्वाहा ।

भूतप्रेतपिशाचब्रह्मराक्षस शाकिनीडाकिन्यंतरिक्षग्रह परयंत्र परतंत्रोच्चटनाय स्वाहा ।

सकलप्रयोजननिर्वाहकाय पंचमुखवीरहनुमते श्रीरामचंद्रवरप्रसादाय जंजंजंजंजं स्वाहा ।

## || फलश्रुति ||

इदं कवचं पठित्वा तु महाकवचं पठेन्नरः ।

एकवारं जपेत् स्तोत्रं सर्वशत्रुनिवारणम् ॥ 15 ॥

द्विवारं तु पठेन्नित्यं पुत्रपौत्रप्रवर्धनम् ।

त्रिवारं च पठेन्नित्यं सर्वसंपत्करं शुभम् ॥ 16 ॥

चतुर्वारं पठेन्नित्यं सर्वरोगनिवारणम् ।

पंचवारं पठेन्नित्यं सर्वलोकवशंकरम् ॥ 17 ॥

https://notespdfdownload.com/

षड्वारं च पठेन्नित्यं सर्वदेववशंकरम् ।

सप्तवारं पठेन्नित्यं सर्वसौभाग्यदायकम् ॥ 18 ॥

अष्टवारं पठेन्नित्यमिष्टकामार्थसिद्धिदम् ।

नववारं पठेन्नित्यं राजभोगमवाप्नुयात् ॥ 19 ॥

दशवारं पठेन्नित्यं त्रैलोक्यज्ञानदर्शनम् ।

रुद्रावृत्तिं पठेन्नित्यं सर्वसिद्धिर्भवेद्ध्रुवम् ॥ 20 ॥

निर्बलो रोगयुक्तश्च महाव्याध्यादिपीडितः ।

कवचस्मरणेनैव महाबलमवाप्नुयात् ॥ 21 ॥

**। इति सुदर्शनसंहितायां श्रीरामचंद्रसीताप्रोक्तं श्री पंचमुखहनुमत्कवचम् ।**


- A To Z All Full Form pdf Download
- Self Introduction in English
- 1000 Verb Forms PDF Download
- Gurucharitra Adhyay 18 pdf

https://notespdfdownload.com/